**B.A. (Honours) Examination 2018**
**Semester-II (CBCS)**
**Sanskrit (Honours)**
**Course : CC-3**
**(Classical Sanskrit , Prose Literature)**

**Time : 3 Hours** **Full Marks : 60**

Questions are of value as indicated in the margin

## Section-A/खण्ड-क

1. कस्यचिद् द्वयस्य उत्तरं दत्त – 8×2=16
   (a) विशिष्टस्य गद्यकारस्य वाणभट्टस्य जीवनपरिचयं ग्रंथ-परिचयं काल-परिचयं च दत्त।
   (b) बाणभट्टस्य शैल्याः विविधस्वरूपाणि समालोचयत।
   (c) शुकनासोपदेशाधारेण लक्ष्मीस्वभाववर्णनं कुरुत।
   (d) गुरूपदेशसंबंधिनीम् अवधारणां शुकनासोपेदशावलम्बनेन वर्णयत।
   (e) शुकनासोपदेशानुसारेण राजस्वभाववर्णनं कुरुत।

2. अधोलिखितं गद्यांशं पठित्वा प्रश्नानुत्तरयत।– (यथायथं एकपदेन वाक्येन वा) 1×8=8

लतेव विटपकानध्यारोहति। गङ्गेव वसुजनन्यपि तरङ्गबुद्बुदचञ्चला। दिवसकरगतिरिव प्रकटित–विविधसंक्रान्तिः। पातालगुहेव तमोबहुला। हिडिम्बेव भीमसाहसैकहार्यहृदया। प्रावृडिवाचिरद्युतिकारिणी। दुष्टपिशाचीव दर्शितानेकपुरुषोच्छ्राया स्वल्पसत्त्वमुन्मत्तीकरोति। उदारसत्त्वममङ्गलमिव न बहु मन्यते।... अमृतसहोदरापि कटुकविपाका। विग्रहवत्यपि अप्रत्यक्षदर्शना। पुरुषोत्तमरतापि खलजनप्रिया। तथाहि-इयं संवर्द्धनवारिधारा तृष्णाविषवल्लीनाम्।

   (a) अस्मिन् गद्यांशे कस्य महिमा वर्णितोऽस्ति।
   (b) विटपकानध्यारोहति अस्य पदस्य सन्धिविच्छेदं कुरुत।
   (c) पातालगुहा अस्य पदस्य समानार्थकं पदं लिखत।
   (d) 'प्रावृट्' इत्यस्य पदस्य समानार्थकं पदं लिखत।
   (e) अस्मिन् गद्यांशे श्रोता कः अस्ति?
   (f) गद्यांशानुसारेण लक्ष्मीः कीदृशी विद्यते?
   (g) हिडिम्बा कस्य भार्या?
   (h) 'करोति'–अस्य पदस्य धातुं लकारञ्च निर्दिशत।

## Section-B/खण्ड-ख

3. कस्यचिदेकस्य प्रश्नस्य उत्तरं दत्त– 10
   (a) दण्डिनः गद्यशैलीं वर्णयत।
   (b) दण्डिनः जीवनपरिचयं कालपरिचयं रचनापरिचयञ्च दत्त।

P.T.O.

(c) "दण्डिनः पदलालित्यम्" इत्युक्तिं सोदाहरणं विवृणुत।

(d) "कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः" अस्याः उक्तेः सार्थकतां वर्णयत।

4. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् यथायथं एकपदेन वाक्येन वा उत्तरयत। 8

येऽप्युपदिशन्ति–"एवमिन्द्रियाणि जेतव्यानि, एवमरिषड्वर्गस्त्याज्यः सामादिरुपायवर्गः स्वेषु परेषु चाजस्रं प्रयोज्यः सन्धिविग्रहचिन्तयैव नेयः कालः स्वल्पोऽपि सुखस्यावकाशो न देयः" इति तैरप्येभिर्मन्त्रिवकैर्युष्मत्तश्चौर्यार्जितं धनं दासीगृहेष्वेव भुज्यते। के चैते वराकाः? येऽपि मन्त्रकर्कशास्तन्त्रकर्त्तारः शुकाङ्गिरसविशालाक्षबाहुदन्तिपुत्रपराशरप्रभृतयस्तैः किमरिषड्वर्गो जितः, कृतं वा तैः शास्त्रानुष्ठानम्?

(a) अस्मिन् गद्यांशे कः कं किम् उपदिशति? 2

(b) गद्यांशे रेखांकितस्य "दासी" पदस्य समानार्थकपदं लिखत। 1

(c) "देयः" अस्य पदस्य प्रकृति-पत्यय-निर्देशं कुरुत। 1

(d) अस्मिन् गद्यांशे मन्त्रकर्कशाः तन्त्रकर्त्तारः च के के सन्ति? 1

(e) गद्यांशानुसारेण सामादिरुपायवर्गाः अरिषड्वर्गाः षाड्गुण्यञ्च लिख्यन्ताम्। 2

(f) "येऽप्युपदिशन्ति" रेखांकितपदे धातुं लकारञ्च निर्दिशत। 1

## Section-C/खण्ड-ग

5. संस्कृतगद्यवाङ्मयस्य उत्पत्तिः विकासश्च सरलसंस्कृतेन विलिख्यताम्। 9

अथवा

"पंडितः अम्बिकादत्तव्यासः आधुनिकगद्यकारेषु प्रथमः गद्यकारः अस्ति"– आलोच्यताम्।

6. केषाञ्चन त्रयाणां टिप्पणीं लिखत— 3×3=9

(a) शुकसप्ततिः।

(b) वेतालपञ्चविंशतिः।

(c) वासवदत्ता।

(d) पञ्चतंत्रम्।

(e) सिंहासनद्वात्रिंशिका।

(f) शिवराजविजयम्।